प्रजनः, जनः, जिजनिषः, जञ्जनः-जाजायः ;

जनितुम्, जनयितुम्, जिजनिषितुम्, जञ्जनितुम्-जाजायितुम् ;

[1]जातिः, [2]अजननिः,[A] जनना, जिजनिषा, जञ्जना-जाजाया ;

जननम्, जननम्, जिजनिषणम्, जञ्जननम्-जाजायनम् ;

जनित्वा, जनयित्वा, जिजनिषित्वा, जञ्जनित्वा-जाजायित्वा ;

प्रजन्य-प्रजाय, [3]प्रजनय्य, प्रजिजनिष्य, प्रजञ्जन्य-प्रजाजाय्य ;

जनम् २, जनित्वा २, } [4]जनम् २-जानम् २, जनयित्वा २, } जिजनिषम् २, जिजनिषित्वा २, } जञ्जनम् २-जाजायम् २; जञ्जनित्वा २-जाजायित्वा २; }

[5]जन्तुः, [6]जनयित्नुः, [7]जनकः, [8]जन्म, [9]जाया, [10]जठरम्, [11]जनुः.

---

1. 'तितुत्र—' (7-2-9) इतीण्णिषेधे, 'जनसनखनां सञ्झलोः' (6-4-42) इति आत्वे, सवर्णदीर्घे रूपम्।

2. स्त्रियां भावे 'आक्रोशे नञ्यनिः' (3-3-112) इत्यनिप्रत्ययः।

3. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः।

4. 'जनीजॄष्—' (गणसूत्रम्—भ्वादौ) इति वचनेन मित्त्वात्, 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति णमुल्परे णौ दीर्घविकल्पः। मित्त्वस्येदमेवासाधारणं प्रयोजनम्।

5. 'कमिमनिजनि—' [द. उ. 1-125] इत्यादिना तुप्रत्ययः। जायते, जजन्ति इति वा जन्तुः=प्राणी।

6. ण्यन्तादस्मात् औणादिके [द. उ. 1-140] इत्नुच्प्रत्यये जनयित्नुः=पिता। 'अयामन्ताल्वाय्येत्न्विष्णुषु च' (6-4-55) इति णेरयादेशः।

7. जनयतीति जनकः=पिता। 'कृकुन् शिल्पिसंज्ञयोः' [द. उ. 3-5] इति कृकुन्प्रत्ययः।

8. 'मनिन्' [द. उ. 6-73] इति मनिनि रूपम्। जायते, जन्यते इति वा जन्म

9. 'जनेर्यक्' [द. उ. 8-13] इति यक्प्रत्ययः। जायते, जन्यते वाऽस्यापत्यमिति जाया=भार्या। 'ये विभाषा' (6-4-43) इत्यात्वे, सवर्णदीर्घे च रूपम्।

10. 'जनेरर ठः' [द. उ. 8-98] इति अरप्रत्यये, धातोश्च ठकारेऽन्तादेशे रूपम्। जायन्तेऽस्मिन् अतिशयेन वातादिवैषम्यात् व्याधय इति जठरम्=उदरम्।

11. 'जनेरुसिः' [द. उ. 9-37] इत्युसिप्रत्ययः। जायते इति जनुः=जन्म।

A. 'तस्य जननिरेवास्तु जननीक्लेशकारिणः॥' शिशुपालवधे 24.5.